दग्धरुहः, पुं, (दग्धोऽपि रोहतीति । रुह + कः ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥

दग्धरुहा, स्त्री, (दग्धापि रोहतीति । रुह + कः टाप् ।) दग्धावृक्षः । इति राजनिर्घण्टः ॥

दग्धा, स्त्री, (दह्यते स्म इव या । दह + क्तः । ततष्टाप् ।) स्थितार्का दिक् । इति मेदिनी । रे, ७ ॥ वृक्षविशेषः । कुरुह इति ख्यातः ॥ तत्पर्य्यायः । दग्धरुहा २ दग्धिका ३ स्वर्ग्गेरुहा ४ रोमशा ५ कर्कशदला ६ भस्मरोहा ७ सुदग्धिका ८ । अस्या गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । कफवातनाशित्वम् । पित्तप्रकोपनत्वम् । जठरानलदीपनत्वञ्च । इति राजनिर्घण्टः ॥ * ॥

मासदग्धा यथा,—सौरचैत्रपौषयोर्द्वितीया एवं ज्यैष्ठफाल्गुनयोश्चतुर्थी वैशाखश्रावणयोः षष्ठी आषाढ़ाश्विनयोरष्टमी भाद्राग्रहायणयोर्द्दशमी कार्त्तिकमाघयोर्द्वादशी । अस्याः प्रमाणं यथा,

"द्वितीया मीनधनुषोश्चतुर्थी वृषकुम्भयोः ।
मेषकर्कटयोः षष्ठी कन्यामिथुनकेऽष्टमी ॥
दशमी वृश्चिके सिंहे द्वादशी मकरे तुले ।
एभिर्यातो न जीवेत यदि शक्रसमो भवेत् ॥"

अस्याः प्रतिप्रसवो यथा, वैशाखे शुक्ला षष्ठी ज्यैष्ठे कृष्णा चतुर्थी आषाढ़े शुक्लाष्टमी श्रावणे कृष्णा षष्ठी भाद्रे शुक्ला दशमी आश्विने कृष्णाष्टमी कार्त्तिके शुक्ला द्वादशी अग्रहायणे कृष्णा दशमी पौषे शुक्ला द्वितीया माघे कृष्णा द्वादशी फाल्गुने शुक्ला चतुर्थी चैत्रे कृष्णा द्वितीया । एतत्प्रमाणं यथा,—

"मेषे दिनेशे वृयुगे मृगेन्द्रे
यूके धनुःस्थे कलसे च शुक्ला ।
कुलीरकन्यालिमृगास्यमीन-
वृषेषु कृष्णास्तिथयः प्रदग्धाः ॥"* ॥

दिनदग्धा यथा,—रविवारे द्वादशी सोमे एकादशी मङ्गले दशमी बुधे तृतीया वृहस्पतौ षष्ठी शुक्रे पञ्चदशी शनौ सप्तमी । एतत्प्रमाणं यथा,

"माषा रुद्रा दिशो रामाः षट्पञ्चमुनयस्तथा ।
दह्यन्ते तिथयः सप्त सूर्य्याद्यैः सप्तसप्तभिः ॥"
इति ज्योतिःसारसंग्रहः ॥

दग्धिका, स्त्री, (कुत्सिता दग्धा । "कुत्सिते ।" ५ । ३ । ७४ । इति कन् ।) दग्धान्नम् । पोड़ा भात इति भाषा । चाची इति ख्याता इति केचिदिति भरतः ॥ तत्पर्य्यायः । भिस्सटा २ । इत्यमरः । २।६।४६ ॥ भिस्सिटा ३ भिस्सिटा ४ भिस्सिटा ५ भिस्सिका ६ । इति तट्टीकासारसुन्दरी ॥ दग्धावृक्षः । इति राजनिर्घण्टः ॥

दग्धेष्टका, स्त्री, (दग्धा इष्टका ।) झामकम् । इति हारावली । २१४ ॥

दघ, इ त्यागे । अवने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) इ, दङ्घते । अवनं रक्षणम् । इति दुर्गादासः ॥

दघ, न घातने । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) न, दघ्नोति । दघ घाते । इति जौमराः पठन्ति । तेन तदर्थकत्वनमेवोचितम् । ततश्च घातनमिति हन्त्यर्थस्य पाणिकचुरादित्वेन स्वार्थे णौ रूपं हननमित्यर्थः । किञ्च हिंसनपाठेनैवेष्टसिद्धे घातनपाठो हिंसाप्रेरणार्थः स्यान्न वेति काकदन्तान्वेषणवद्विफलं चर्य्यायामेव कातन्त्राद्यसम्मतत्वात् । इति दुर्गादासः ॥

दण्ड, त् क ततूपाते । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) ततूपातस्तद्दण्डपातनम् । क, दण्डयति दण्डापयति अपराधिनं राजा । इति दुर्गादासः ॥

दण्डः, पुं क्ली, (दण्डयति अनेनेति । दण्ड + घञ् । यद्वा, दाम्यत्यनेनेति । दम् + "ञमन्तात् डः ।" उणां १ । ११३ । इति डः ।) लगुड़ः । इत्यमरः । ३ । ३ । ४१ ॥ (यथा, हठयोगप्रदीपिकायाम् । ३ । ११ ।
"यथा दण्डहतः सर्पो दण्डाकारः प्रजायते ॥")
तस्य धारणगुणाः । स्खलतः संप्रतिष्ठानत्वम् । शत्रुनिषेधनत्वम् । अवष्टम्भनत्वम् । आयुष्यत्वम् । भयघ्नत्वञ्च । इति राजवल्लभः ॥ (यथा, चिकित्सितस्थाने चतुर्व्विंशेऽध्याये सुश्रुतेनोक्तम् ।
"पुनः सरीसृपव्यालविषाणिभ्यो भयापहम् ।
श्रमस्खलनदोषघ्नं स्थविरे च प्रशस्यते ॥
सत्त्वोत्साहबलस्थैर्य्यधैर्य्यवीर्य्यविवर्द्धनम् ।
अवष्टम्भकरञ्चापि भयघ्नं दण्डधारणम् ॥")
शरणागतरक्षणादि । यथा,—
"शरणागतसंत्राणं भूतानामप्यहिंसनम् ।
बहिर्व्वेदि च यद्दानं दण्डमित्यभिधीयते ॥"
इति मोक्षधर्म्मः ॥
(दण्डाकारत्वात् छत्रादीनामङ्गविशेषः । यथा, वृहत्संहितायाम् । ७३ । ४,६ ।
"युवराजनृपतिपत्न्याः सेनापतिदण्डनायकानाञ्च ।
दण्डोऽर्द्धपञ्चहस्तः समपञ्चकृताङ्गविस्तारः ॥"
"अन्येषाञ्च नराणां शीतातपवारणन्तु चतुरस्रम् ।
समवृत्तदण्डयुक्तं छत्रं कार्य्यं तु विप्राणाम् ॥"
चामरादीनामङ्गविशेषश्च । यथा, तत्रैव । ७२ । ३-४ ।
"अध्यर्द्धहस्तप्रमितोऽस्य दण्डो
हस्तोऽथवारत्निसमोऽथवान्यः ।
काष्ठात् शुभात् काञ्चनरूप्यगुप्तात्
रत्नैर्विचित्रैश्च हिताय राज्ञाम् ॥
यष्ट्यातपत्राङ्कुशवेत्रचाप-
वितानकुन्तध्वजचामराणाम् ।
व्यापीततन्त्रीमधुकृष्णवर्णा
वर्णक्रमेणैव हिताय दण्डाः ॥"
ब्रह्मचारिधार्य्यलगुड़ाकारपदार्थः । यथा, देवीभागवते । १ । १६ । ३१ । शुकं प्रति जनकस्योक्तिः ।
"दण्डाजिनकृता चिन्ता यथा तव वनेऽपि च ।
तथैव राज्यचिन्ता मे चिन्तयानस्य वा न वा ॥"
वर्णभेदेन तत्प्रमाणादिकमुक्तम् । यथा, मनौ । २ । ४५-४७ ।
"ब्राह्मणो वैल्वपालाशौ क्षत्त्रियो वटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्म्मतः ॥
केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः ।
ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः ॥
ऋजवस्ते तु सर्व्वे स्युरव्रणाः सौम्यदर्शनाः ।
अनुद्वेगकरा नृणां सत्वचो नाग्निदूषिताः ॥"
बाणनिक्षेपकालीन स्थानविशेषे, क्ली । यथा, आग्नेयधनुर्व्वेदे ।
"तिर्य्यग्भूतो भवेद्वामो दक्षिणोऽपि भवेदृजुः ।
गुल्फौ पार्ष्णियुतौ चैव स्थितौ पञ्चाङ्गुलान्तरौ ॥
स्थानं दण्डं भवेदेतत् द्वादशाङ्गुलमायतम् ॥")

दण्डः, पुं, (दण्डयत्यपराधिनमनेनेति । दण्ड + घञ् । यद्वा, दाम्यति शान्तं करोत्यनेन । दम + डः ।) राज्ञां चतुर्थोपायः । (यथा, देवीभागवते । १ । १७ । ३ ।
"विना दण्डं कथं राज्यं करोति जनकः किल ।
धर्म्मे न वर्त्तते लोको दण्डश्चेन्न भवेद् यदि ॥")
स च त्रिविधः । वधः अर्थग्रहणं बन्धनताड़नादिश्च । इत्यमरटीकायां सारसुन्दरी ॥ तत्पर्य्यायः । साहसम् २ दमः ३ । इत्यमरः । २ । ८ । २१ । (दण्ड + भावे घञ् । दमनम् । (यथा, मनुः । १२ । १० ।
"वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च ॥"
दण्ड इवाचरतीति । दण्ड + क्विप् । ततो भावे घञ् ।) ऊर्द्धस्थितिः । दाँड़ान इति भाषा । इति सारसुन्दरी ॥ व्यूहभेदः । (अस्य लक्षणभेदादिकं यथा, अग्निपुराणे २४१ अध्याये ।
"मण्डलासंहतौ भागौ दण्डास्ते बहुधा शृणु ।
तिर्य्यग्वृत्तिस्तु दण्डः स्यात् भोगोऽन्या वृत्तिरेव च ॥
मण्डलः सर्व्वतोवृत्तिः पृथग्वृत्तिरसंहतः ।
प्रदरो दृढ़कोऽसह्यश्चापो वै कुक्षिरेव च ॥
प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ ।
विशालो विजयः सूची स्थूणा कर्णचमूमुखौ ॥
सर्पास्यो वलयश्चैव दण्डभेदाश्च दुर्ज्जयाः ।
अतिक्रान्तः प्रतिक्रान्तः कस्याभ्यासैकपक्षतः ॥
अतिक्रान्तस्तु पक्षाभ्यां द्वयोरन्ये तद्विपर्य्यये ।
पक्षोरस्यैरतिक्रान्तः प्रतिष्ठोऽन्यो विपर्य्ययः ॥
स्थूणापक्षो धनुःपक्षो द्विस्थूणो दण्ड ऊर्द्धगः ।
द्विगुणोऽयन्त्वतिक्रान्तपक्षोऽन्यस्य विपर्य्ययः ॥
द्विचतुर्दण्ड इत्येते ज्ञेया लक्षणतः क्रमात् ।
गोमूत्रिका हि सञ्चारी शकटो मकरस्तथा ॥")
प्रकाण्डः । अश्वः । कोणः । मन्थानः । सैन्यम् । कालः । घड़ी इति भाषा । मानभेदः । काठा इति भाषा । ("हस्तैश्चतुर्भिर्भवतीह दण्डः ।" इति लीलावती ॥) चण्डांशोः पारिपार्श्विकः । (यथा, महाभारते । ३ । ३ । ६८ ।
"ये च तेऽनुचराः सर्व्वे पार्श्वोपान्तं समाश्रिताः ।
माठराद्यण्डकाद्यास्तांस्तान् वन्देऽशनिक्षुभान् ॥")
यमः । अभिमानः । इति मेदिनी । डे, १६ ॥ ग्रह-